# Shri Ramakrishna Stutih

# श्रीरामकृष्णस्तुतिः

## Document Information

Text title : Shri Ramakrishna Stutih

File name : rAmakRRiShNastutiH3.itx

Category : deities_misc, gurudev, rAmakRiShNa, stuti

Location : doc_deities_misc

Author : Vidhubhushana bhattacharyasaptatirtham pranita

Proofread by : Aruna Narayanan

Description-comments : rAmakRiShNastotramAlA, stavanAnjali

Acknowledge-Permission: Ramakrishna Shivananda Mission, Varasat

Latest update : June 12, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 12, 2023

*sanskritdocuments.org*

# श्रीरामकृष्णस्तुतिः

गुणातीतचित्तं परज्ञानवित्तं
महायोग-साक्षात्कृत-ब्रह्मतत्त्वम् ।
महिम्ना द्युलोक प्रसर्पन्महत्वं
भजे रामकृष्णं महाशुद्धसत्त्वम् ॥ १॥

वरेण्यं शरण्यं कृपाप्रावृषेण्यं
जगन्मातृहस्ताम्बुजस्पर्श धन्यम् ।
महामोहनाशाभिलाषैः प्रपन्नं
भजे रामकृष्णं समाधिप्रसन्नम् ॥ २॥

समाराध्यतन्त्रैर्महाशक्तिमन्त्रैः
समीयागताया जगन्मातुरङ्के ।
लसद्दिव्यकान्तिच्छटाभिर्विभान्तं
भजे रामकृष्णं त्रिलोक्यां महान्तम् ॥ ३॥

निरुद्धान्तरत्वादनिष्पन्दकायं
परज्योतिरुत्सादितोत्तुङ्गमायम् ।
स्थितं निर्विकल्पे समाधौ प्रशान्तं
भजे रामकृष्णं परध्यानवन्तम् ॥ ४॥

प्रशान्तं महान्तं त्रितापं हरन्तं
कृतान्तं जयन्तं गिरीशं स्मरन्तम् ।
चितब्धौ निमज्जन्तमुग्रं तपन्तं
भजे रामकृष्णं भवानीं भजन्तम् ॥ ५॥

यः कामकाञ्चनमोहमुक्तः
नित्ये परब्रह्मणि नित्ययुक्तः ।
योगीन्द्रवृन्दार्चितपादपद्मं
तं नौमिदेवं भवरोगवैद्यम् ॥ ६॥

विश्वार्तिखण्डनविभावनबद्धचेता-
स्तत्वार्थनिर्णयविधौ समिति प्रमाता ।
दृष्ट्या तृणीकृत जगद्विषयाभिलाषं
तं नौमि दुर्लभसमागममिष्ट भाषम् ॥ ७॥

यो मृण्मयीं स्वतपसा कृतचिन्मयीं तां मूर्तिं
व्यलोकयद् सन्मतिभागिनेऽस्मिन् ।
पुत्रीयति प्रतिपदं जगदेकमाता यं
शाम्भवी क्षितितले मम सोऽस्तु पाता ॥ ८॥

लीलार्थमीप्सित-विशुद्ध विवाह रङ्गं
शक्त्या विधित्सितमनोजविलास भङ्गम् ।
अङ्गीकृतानघजितेन्द्रिय साधुसङ्गं
तं नौमि दुर्दमविषयेष्वसङ्गम् ॥ ९॥

अतुलितमहिमानं ब्रह्मवित्सु प्रधानं
भगवदमृतपानं तत्त्वबोधैकदानम् ।
विबुधनिकरशाश्वद्भक्ति पूजा प्रदानं
कुमति तिमिरहानं नौमि वन्द्यातिमानम् ॥ १०॥

सगुणमिति यदस्मिन् नामरूप प्रभिन्नं
पुनरपगत भेदं निर्गुणं स्यात्तदेव ।
निजविदित रहस्यं सर्वतो व्याहरन्तं
त्रिदिव वसति पूज्यं नौमि तं ज्ञानवन्तम् ॥ ११॥

वलयितविमलार्चिर्वेष्टितं निश्चलाङ्गं
शुचि ललित निजाङ्के न्यस्तहस्ताब्जयुग्मम् ।
मुकुलितकमलाक्षं पञ्चवट्यां निषण्णं
समधिगतसमाधिं नौमिदेवं प्रसन्नम् ॥ १२॥

भ्रमरवृतसरोज श्रीमुषाश्मश्रुलेन शशिसित-
रुचिभाजा भ्राजमानं मुखेन ।
जगदघनिकरान्तं वीक्षणैः कारयन्तं
पदकमलमुपेतान् नौमि नः पावयन्तम् ॥ १३॥

त्रिभुवनजनसारं सर्वविद्याविहारं

घनकुमतिविदारं ब्रह्मतत्त्व प्रचारम् ।
तमिह परमहंसं त्यागिवर्यं सदारं
क्षयितदुरितभारं नौमि दिव्यावतारम् ॥ १४॥

बीजं मुक्तितरोरनर्थभुजगीसन्दंशनिस्तारकं
धामं प्रेम रसस्य मोहदुरिता शुद्धात्मनां पावकम् ।
यत् साक्षाज्जनयेदमन्दमनसां चिच्छक्तिवृत्युद्भवं
भूयात् तच्चरणं सदैव शरणं श्रीरामकृष्णस्य नः ॥ १५॥

अन्तर्ज्योतिरवेक्षण प्रमुदिताम्भोजायमानेक्षणं
चेतोवृत्तिनिरोध निश्चलतनुं निर्बीजयोगस्थितम् ।
प्रह्लादद्युतिसुन्दरोज्ज्वलमुखं निर्वातदीपोपमं
तं वन्दे यतिराजमुन्नतकरं दण्डायमानं गुरुम् ॥ १६॥

नानातत्त्वमयं गिरा सरलया गूढार्थविज्ञापकं
प्रेष्ठं यस्य कथामृतं हृदि नृणां सन्ताप संहारकम् ।
प्रज्ञाभास्करदिव्यदीप्त महिम प्रक्रान्तदिङ्मण्डलं
तं वन्दे भगवन्तमिष्टशरणं श्री रामकृष्णाह्वयम् ॥ १७॥

सर्वैर्धर्मपथैरनन्तमहिमा लब्धव्य एकेश्वरः
यस्यैतद्वचनाशनिर्विवदतां मोहाद्रिविद्रावणम् ।
शश्वत्साधितसर्वधर्म शरणिं तत्त्वार्थिकल्पद्रुमम् ।
तं वन्दे धृतविग्रहामरवरं श्रेष्ठावतारं कलौ ॥ १८॥

नाना मार्ग प्रभिन्ना धृतगतिसरितः सागरं निर्विकारं
गत्वा प्रनष्टभेदाः परिगत समता अन्विताः स्युर्यथास्मिन् ।
तद्वयं सर्वभावा विषममतिमता ज्ञाततत्त्वैकसारं
लब्ध्वा नष्टप्रभेदास्तमिह यतिवरं रामकृष्णं प्रवन्दे ॥ १९॥

अखण्डानन्द बोधाय पूर्णाय देवतात्मने ।
नमोऽस्तु रामकृष्णाय नित्य चैतन्यरूपिणे ॥ २०॥

इति विधुभूषण भट्टाचार्य सप्ततीर्थं प्रणीता
“श्रीरामकृष्णस्तुतिः” सम्पूर्णम् ।

Proofread by Aruna Narayanan

*Shri Ramakrishna Stutih*

pdf was typeset on June 12, 2023

Please send corrections to *sanskrit@cheerful.com*